SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# आधुनिकसंस्कृतसाहित्ये अवतारपुरुषो महात्मगान्धी

**Dr. Sumanta Chowdhury**
Assistant Professor, Dept. of Sanskrit
Sabang Sajanikanta Mahavidyalaya
Lutunia, Sabang, Paschim Medinipur, West Bengal, India
Email: srimansumanta@gmail.com

**Abstract:** मोहनदासकरमचाँदगान्धी भारतस्य स्वाधीनतासंग्रामस्य प्रधानपुरुष आसीत्। तस्य वर्णमयं जीवनचरितमाधारीकृत्य आधुनिककवयः असंख्येयानि काव्यानि रचयामासुः। भारतराष्ट्रनिर्माता महात्मा गान्धी सत्यस्य, अहिंसायाश्च प्रतिमूर्तिः आसीत्। सर्वेषु प्राणिषु आसीत् तस्य समभावः। स आसीत् क्षमाशीलः, सर्वान् भारतीयान् च प्रति स्नेहशीलः, निःस्वार्थी, परोपकारी, दयावान्, उत्साही, संयमी च। एतादृशगुणगुणविशिष्टः महात्मा सहृदयहृदयम् आकर्षेत् इत्यत्र किम् आश्चर्यम्। केचन कवयः तस्य जीवनदर्शनेन प्रभाविताः कवयः तस्य चरितवर्णनकाले तं दिव्यपुरुषरूपेण अवताररूपेण वा प्रतिष्ठापयितुं चेष्टितवन्तः। तत्साधयितुं तैः ब्रह्मा-विष्णु-महेश्वर-नारदादि-अलौकिकतत्त्वानां ब्रह्मविष्ण्वादिलोकानां च कल्पनां चक्रुः। वस्तुतः लौकिकानां पदार्थानाम् अलोकसामान्यतया वर्णनमेव कवेः कवित्वम्। गान्धिनः जीवनचरितम् आश्रित्य कवीनां काव्यरचनस्य महदेकमुद्देश्यं यत् काव्यमाध्यमेन जनमनसि राष्ट्रियभावनाजागरणं, भ्रातृत्वभावनाप्रोद्बोधनं, परतन्त्रतादोषविमुक्तिचिन्तनञ्च। देशवासिषु उत्साहस्य, साहसस्य, आत्मबलस्य, स्वाभिमानस्य, स्वदेशीयतायाश्च भावना यथा सञ्चारिता स्यात् स्यात् तदर्थमेव तदानीन्तनकविभिः अवतारपुरुषरूपेण वर्णितः महात्मा गान्धी। अस्मिन् प्रबन्धे तत्तत्काव्येषु दिव्यपुरुषवर्णनप्रसङ्गः आलोच्यते।

**Keywords:** महात्मा गान्धी, अवतारः, विष्णुः, कृष्णः, हरिः, ब्रह्मा, स्वतन्त्रता चेत्यादयः।

**उपोद्घातः—**

अहिंसया सत्यबलेन चैव कार्याण्यसाध्यान्यपि यान्ति सिद्धिम्।
इत्थं व्रतं यस्य सदा समृद्धं जयत्यसौ मोहनदासगान्धी॥[1]

सत्यम् अहिंसां च जीवनस्य आधाररूपेण गृहीत्वा भारतीयस्वतन्त्रासंग्रामे यः स्वजीवनं निवेदितवान् स हि भारतमातुः एकनिष्ठसेवकः मोहनदासकरमचन्दगान्धी। तस्य जीवनदर्शनं यथा राजनैतिकक्षेत्रं तथैव संस्कृतसाहित्यमपि समभावेन प्रभावितं चकार। आधुनिकसंस्कृतसाहित्ये गान्धिजीवनं तद्दर्शनञ्च कवीनां प्रेरणास्रोत इव आसीत्। ख्रीष्टीय-ऊनसप्तत्यधिकाष्टादशशततमे ईशवीयाब्दे अक्टोवरमासस्य द्वितीये दिनाङ्के करमचन्दगान्धि-पुतलीबाइगान्धिमहोदययोः पुत्ररूपेण जनिं लेभे मोहनदास-करमचन्दगान्धी। तस्य ईहलोकत्यागः अष्टचत्वारिंशदधिक-ऊनविंशशततमेशवीयाब्दस्य जानुयारीमासस्य त्रिंशत्तमदिनाङ्कः। एवम् अष्टसप्ततिवर्षमिते आयुषि तस्य यद् वर्णमयं जीवनं तदाधारीकृत्य अन्यासु भाषासु यथा साहित्यसर्जनम् अभवत् तथैव संस्कृतभाषायमपि नास्ति अयं विषयः विरलः। काले काले सज्जनाश्रयं साधुजनचरित्रविषयं वा आधारीकृत्य कविभिः काव्यानि विरचितानि। आधुनिककवयः अपि वैदेशिकप्रभावात् भारतमातरम् उद्धर्तुं धराधाम्नि आविर्भूतं शस्त्रहीनमपि शत्रूणां हृदयविदारकं सत्येन पथा

भारतभूमौ स्वाधीनसूर्योदयहेतुभूतं महात्मगान्धिनम् आश्रित्य विविधकाव्यानि रचयामासुः।

ऊनविंशशतकस्य उत्तरभागः विंशशतकस्य च पूर्वभागः भारतवर्षस्य संक्रान्तिकाल आसीत्। एकस्यां दिशि वैदेशिकैः दुर्नीतिपरायणैः आक्रान्ताः भारतीयाः परस्परं जिघांसवः आसन्, कुपथगामिनः, मानसिकसन्तोलनविरहिताश्च अभवन् अपरस्यां दिशि बहवः महापुरुषाः धराधाम्नि अवातरन् यैः स्वप्राणान्नपि अविगणय्य वैदेशिकात् देशमातरम् उद्धर्तुं प्रयत्नः विहितः। तेषु महापुरुषेषु महात्मा गान्धी, महाराणी लक्ष्मीबाइ, सुभाषचन्द्रवोसः, जवहरलालनेहरू, बालगङ्गाधकतिलकः, सर्दार-बल्लभभाइपटेल चेत्यादयः प्रसिद्धाः। एतादृशानां महापुरुषाणां जीवनदर्शनं जीवनगाथां च आधारीकृत्य तदानीन्तनैः तत्परवर्तिभिश्च कविभिः काव्यानि रचितानि। भारतं पराधीनतामुक्तं विधातुं महात्मगान्धिनः अविस्मरणीययोगदानम् आसीत्। तस्य जीवनचरितं न केवलं भारतीयानाम् अपि तु समग्रविश्वस्य कृते प्ररणीयम् आसीत्। स्वतन्त्रतासंग्रामे बहवः भागं गृहीतवन्तः, स्वात्मीयमायां परित्यज्य सम्पूर्णं जीवनं देशस्य स्वतन्त्रतायै समर्पितवन्तः, कारागृहस्य कष्टं सहितवन्तः, प्राणान्नपि सहास्यं त्यक्तवन्तः, परन्तु स्वीय-उन्नतजीवनादर्शेन महात्मा गान्धी अन्येभ्यः विशिष्टं स्थानम् अर्जितवान्। भारतराष्ट्रनिर्माता महात्मा गान्धी सत्यस्य, अहिंसायाश्च प्रतिमूर्तिः आसीत्। सर्वेषु प्राणिषु आसीत् तस्य समभावः। स आसीत् क्षमाशीलः, सर्वान् भारतीयान् च प्रति स्नेहशीलः, निःस्वार्थी, परोपकारी, दयावान्, उत्साही, संयमी च। एतादृशगुणगुणविशिष्टः महात्मा सहृदयहृदयम् आकर्षेत् इत्यत्र किम् आश्चर्यम्।

गान्धिमहोदयस्य जीवनचरितम् आश्रित्य कवीनां काव्यरचने अन्यदपि उद्देश्यं स्यात् यत् अनेन काव्यमाध्यमेन जनमनसि राष्ट्रियभावना जागरिता स्यात्। तेषु भ्रातृत्वभावना प्रोद्बोधिता भवेत्। परतन्त्रतादोषात् मुक्ताः स्युः भारतीयाः। देशवासिषु उत्साहस्य साहसस्य, आत्मबलस्य, स्वाभिमानस्य, स्वदेशीयतायाश्च भावना सञ्चारिता स्यात्। गान्धिनः जीवनादर्शानुसरणेन समाजस्य राष्ट्रस्य च कल्याणं भवेत्।

कवयः हि क्रान्तदर्शिनः। लौकिकपदार्थानां अलोकसामान्यतया वर्णनमेव कवेः माहात्म्यम्। महात्मा गान्धी तत्समयकाले न केवलं भारते वर्षे अपि तु समग्रेऽपि विश्वे स्वकर्मणा वाण्या च प्रसिद्ध एव आसीत्। तादृशस्य प्रसिद्धस्य युगपुरुषस्य चरितवर्णनकाले तज्जीवनाधारितानाम् ऐतिहासिकतथ्यानां यथाक्रमम् उपन्यास एव कवीनां लक्ष्यं स्यात् इति वक्तुं न शक्यते। केचन कवयः तस्य जीवनदर्शनेन प्रभाविताः कवयः तस्य चरितवर्णनकाले तं दिव्यपुरुषरूपेण अवताररूपेण वा प्रतिष्ठापयितुं चेष्टितवन्तः। तत्साधयितुं तैः ब्रह्मा-विष्णु-महेश्वर-नारदादि-अलौकिकतत्त्वानां ब्रह्मविष्णवादिलोकानां च कल्पनां चक्रुः। तथाहि –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ [2]

इति भगवतः वाणी एव प्रमाणयति धराधाम्नि यदैव धर्मस्य ग्लानिः, अधर्मस्य च प्रसारः तदैव धर्मसंस्थापनार्थाय भगवतः अवताररूपेण आविर्भावः भवति। तस्मादेव देवभूमौ भारते वर्षे वैदेशिकनिपीडनजर्जरितान् भारतीयान् उद्धर्तुं देवाः महात्मगान्धिरूपेण जनिं लेभिरे।

**विष्णोः अवताररूपेण महात्मा गान्धी—**

**भगवदाचार्यस्य** (१८८०-१९७७) प्रसिद्धं महाकाव्यमेकं भवति भारतपारिजातम्। तत्र महात्मा गान्धी अवतारपुरुषरूपेण वर्णितः। तथाहि तत्र तेनोक्तं गान्धनः जन्मनः पूर्वं त्रिलोकनाथः भगवान् विष्णुः

पुतलीदेव्याः तपस्यया प्रसन्नः सन् स्वप्नादेशे तद्गृहे अवताररूपेण आविर्भावस्य पूर्वसूचनां दत्तवान्। तथाहि तत्रोक्तं –

इह विविधसमर्चाचर्चितोऽद्यैव वत्से तव परमपवित्रं गर्भगेहं विशामि।

प्रसदतिकुविद्याकल्पितानेकरूढिर्व्यथितजनशुभायेत्याह सा दिव्यमूर्तिः॥[3] इति।

अत्र स्वप्ने कापि दिव्यमूर्तिः दुःखजर्जरितमनुष्याणां कल्याणाय गर्भप्रवेशसूचनां प्रदाय अन्तर्लीना अभूत् इत्युक्तम्। तत्रैव गान्धिनः जन्मवृत्तान्तकथनकाले कविना उक्तं –

विपत्तिरिष्ये निखिलेऽत्र लोके हाहेतिशब्दे वितते जगत्सु।

मासे सहस्ये जगदेकनाथः श्रीपुत्तलेर्गर्भगृहं विवेश॥[4] इति।

अर्थात् सर्वे अपि जगज्जनाः दुःखपङ्कनिमज्जिताः, सर्वाश्च दिशो हाहाकारशब्दविषण्णा आसन् तदा माघे मासि भगवान् जगदेकनाथः पुत्तलीवाई-देव्याः गर्भम् अलञ्चकार। स्वर्गनिवासिन्यः देव्यश्च गर्भिणीं तां पुत्तलीदेवीं सिषेविरे। तथाहि तत्रोक्तं –

नित्यं प्रयत्नैर्गुणविश्रुताया देव्याश्च तस्याः सविधे स्थितं तत्।

वृन्दं सुरीणां समुपेत्य नाकाद्गर्भे सिषेवे श्रितदेवदेवम्॥ इति।

तत्रैव "हरेः सपर्यां क्रमतो विधातुम्"[5], "ऐश्वरी सा। कृष्णे च पक्षेऽवततार"[6], "गृह्णाति विष्णुर्जनिमित्यहृष्यन्सन्तो विनिर्धूतमनःकषायाः"[7], "तत्पूर्तये श्रीहरिरेष एतीत्येवं विचिन्त्यातिमुदं प्रपेदे"[8], "तस्मिन्दिने श्रीहरिरात्तबाल्यः श्रीपुत्तलेरुत्तमभाग्यसीम्नः"[9] इत्यादिभिः वाक्यैः कविः भगवदाचार्यः श्रीहरेः महात्मगान्धिरूपेण अवतरणं वर्णितम्। एवं शैशवावस्थायाः वर्णनकाले कविः साक्षात् भगवतः स्वरूपमेव वर्णयति–

"नो शैशवं यस्य न यौवनं नो स्त्रीत्वं न पुंस्त्वं न नपुंसकत्वम्।

वृद्धिक्षयाभ्यां रहितश्चिदात्मा लीलावपुष्माञ्छिशुतां प्रपेदे॥"[10]

एवं शैशवयौवनलिङ्गवृद्धिक्षयरहितः परमेश्वरः जगदुद्धाराय लीलया शिशुरूपं गृहाण इत्युक्तम्।

परमहंसपरिव्राजकस्वामी श्रीमद्भगवदाचार्यः महात्मगान्धिनः स्वतन्त्रतासंग्रामे सहभागी आसीत्। गान्धिनः आश्रमे बालकेभ्यः पाठदानं तेनैव क्रियते स्म। महात्मगान्धिनः तपोमय-त्यागमय-साम्प्रतिकसद्भाव-देशभक्तिभिः प्रभावितः सन्नेव तस्य काव्येषु अतिमानवरूपेण गान्धिचरितं चित्रयामास।

**नरोत्तममोतीरामशास्त्रिमहोदयेन** अपि तदीये गीताचारित्र्यकाव्ये विष्णोरवताररूपेण चित्रितः महात्मा गान्धी। गान्धिवर्यस्य जन्मप्रसङ्गवर्णनकाले तेन विष्णु-नारद-सत्याचार्यादीनाम् अतिमानुषतत्त्वानां संकल्पनं विहितम्। तथाहि तीर्थभ्रमणकाले नारदमुनिः दुःखपङ्कनिमग्नान् भारतीयान् वीक्ष्य अस्ति वा कश्चित् आदर्शो महामानवः यः कलियुगे मानवान् सन्तरिष्यति इति चिन्तयन् विषण्णचित्तः सन् विष्णुलोकं ययौ। विष्णुः नारदमुनेः दुःखहेतुं विज्ञाय न्यवेदयत् ऊनविंशशताब्द्यां गीतावाणीप्रचाराय आदौ लोकमान्यबालगङ्गाधरतिलकस्य आविर्भावो भविष्यति, यः खलु कर्मयोगमार्गेण भारतस्य स्वतन्त्रताया उद्घोषणां विधास्यति। तदनु मदंशेन ममैव परमानुरक्तस्य भक्तश्रेष्ठस्य गृहे पूर्णगुणगणमण्डितः महात्मा पुरुषः अवतिष्यति यः गीतावाक्यानुगुणं स्वचरित्रं निर्मास्यति। तथाहि -

तदा मदंशजनितो मद्भक्तस्य पुरे कुले।

मानुष्यगुणपूर्णोऽयं महात्मा संभविष्यति॥

गीतावाक्यानि सर्वाणि चारित्र्ये स्थापयिष्यति।

सोऽयं पूर्णो मनुष्यः स्यादिति मे शुभवाञ्छना॥[11] इति।

विष्णुः नारदं कथयति कलियुगे मदिच्छया सत्याचार्यनामकः विद्वान् विक्रमाख्यं राजानं वृत्तान्तमिमं वक्ष्यति। किञ्च भगवतो वचनानुसारं सन्तुष्टः नारदः काले समागते सत्याचार्यस्य हृदयं प्राविशत्। तथाहि–

भगवद्वचनैरेवं संतुष्टो नारदो मुनिः।

सत्याचार्यस्य हृदयं काले प्राप्ते प्रविष्टवान्॥[12] इति।

नारदप्रेरणयैव विद्वान् सत्याचार्यः विक्रमनृपतेः सभां प्राप्तः प्राणिनां भविष्यविषये आपृष्टः सहस्रयुगवर्षपूर्वमेव योगसमाधिबलेन महात्मगान्धिनः अवताररूपेण जन्म निर्धारितमिति सूचनाय उक्तं यथा भगवान् त्रेतायुगे नृसिंहरूपेण तथा द्वापरयुगे कृष्णरूपेण अवातरत्, तथैव पञ्चसहस्रवर्षेभ्यः परं कलियुगे १९२५-विक्रमसंवत्सरे वैष्णवपरिवारे सर्वगुणसम्पूर्णः मदंशजः मनुजेश्वरः अवताररूपेण जनिष्यति इति।

वस्तुतः अयं संवादः सम्पूर्णतया कल्पित एवेति कविः स्वयमेव कथयति –

सत्यं वक्ष्ये चरित्रं च तथाप्यत्र चमत्कृतौ।

प्रसङ्गपुष्टिहेत्वर्थं करिष्ये कल्पनां क्वचित्॥

पूर्वं प्रमाणजनका कल्पना क्रियते मया।

आचार्यस्य च शिष्याणां संवादोऽप्यत्र कल्पितः॥

सत्याचार्यकथाभागे प्रमाणं सत्यसंहिता।

कृष्णनारदसंवादस्तत्सत्यार्थं त्वकल्पितः॥[13] इति।

**शिवगोविन्दत्रिपाठीमहोदयेनापि विष्णोरंशरूपेण महात्मा गान्धी निरूपितः।** विपद्ग्रस्तान् जनान् उद्धर्तुकामः श्रीविष्णुः स्वशक्तिबलेन विशिष्टं पुरुषम् अवतारयति जगति। तथाहि तत्रोक्तं –

यदा जगत्यां विपदासु मग्नान् आलोकते स्वीयजनान् मुरारिः।

तदा स्वकीयं पुरषं विशेषं कुत्रापि जातं नितरां करोति॥[14] इति।

**रघुनाथप्रसादचतुर्वेदमहोदयेन** तदीये काव्ये **हरेरवताररूपेण** प्रख्यापितो महात्मा गान्धी। हरिरेव काले काले आर्तत्राणाय पापिनां विनाशाय रामकृष्णादिरूपेण पृथिव्याम् अवतरति इति भारतीयानां दृढो विश्वासः। स एव हरिः कलौ काले अपि महात्मगान्धिरूपेण जनिं लेभे। तथाहि –

तदा गान्धीस्वरूपेणावातरत् श्रीहरिर्भुवि।

अवतारा ह्यसंख्येया यतः सत्त्वनिधेर्हरेः॥[15] इति।

काव्यस्यान्तिमे गान्धिनः निधनप्रसङ्गे तेनोक्तं पराधीनभारते महात्मगान्धिरूपा स्वर्गीया विभूतिः स्वातन्त्र्यानयनेन कृतकृत्या सती देवताभिरेव स्वर्धाम नीता। तथाहि–

या स्वर्गीया विभूतिर्हि गान्धिरूपेण भारते।

आगता कार्यपूर्तौ सा नीता तत्रैव निर्जरैः॥[16] इति।

ब्रह्मानन्दशुक्लमहोदयेन तदीये श्रीगान्धिचरितखण्डकाव्ये **भगवतः कृष्णस्य अवताररूपेण** वर्णितः महात्मा गान्धी। तथाहि तत्रोक्तं –

पित्रोस्तपोव्रातफलैरमेयैः समेधितो विश्वगुरुर्यथा सः।

बालोऽप्यबालोचितधैर्यसिन्धुः सौराष्ट्रदेशेऽवततार कृष्णः॥[17] इति।

**ब्रह्मणः अवताररूपः महात्मगान्धी—**

**श्रीसाधुशरणमिश्रमहोदयेन** तदीये श्रीगान्धिचरितकाव्ये ब्रह्मणः अवताररूपेण गान्धिमहोदयः वर्णितः। पृथिव्यां सर्वत्र प्रजानां निर्यातनं, सतीत्वलोपः, गोहननं चेत्यादीनि पापकार्याणि वीक्ष्य गुजरातप्रदेशे पुतलीदेव्या गर्भे अवताररूपेण जनिं लेभे ब्रह्मा। तथाहि तत्रोक्तं –

इत्थं प्रजानां कदनं समन्ताद् गवां विघातञ्च सतीत्वलोपम्।
अधर्मराज्यं विततं पृथिव्यां तद्रक्षितुं चिन्तितवान् विधाता॥
सतां च धर्मस्य च रक्षणार्थं युगे युगे मे तनुधारणं वै।
इति प्रतिज्ञा नु कृता मया सा तथा विधातुं समयोऽधुनायम्॥
ततो विभुर्दिव्यदृशा विमृश्य स्थानं तदर्हं मनसा स्वयम्भूः।
महीतले सोऽवतरीतुकामो विनिश्चितं गुर्जरमेव चक्रे॥[18] इति।

एवं बहुत्र आधुनिकसंस्कृतकाव्येषु दिव्यपुरुषरूपेण महात्मगान्धिनः चरित्रचित्रणं दरीदृश्यते।

**निष्कर्षः –**

भारतस्य संस्कृतौ, इतिहासे, साहित्ये च अवतारवादः सुप्रसिद्धो विषयः। सुप्राचीनकालात् अद्यावधि सनातनहिन्दूनां मनसि अयमेव विश्वासः वरीवर्ति यत् यदैव जगति धर्मस्य ग्लानिर्भवति तदा साधूनां परित्राणाय, पापिनां च विनाशाय भगवान् अवताररूपेण पृथिव्याम् अवतरति। अवपूर्वकात् तृधातोः "अवे तृस्त्रोर्घञ्" (अष्टा. ३/३/१२०) इति सूत्रेण अधिकरणार्थे घञ्प्रत्यये अवतारशब्दो निष्पद्यते। यं शरीरम् आश्रित्य भगवान् लीलाकार्यं सम्पादयति तच्छरीरम् अवतार इत्युच्यते। पुराणेषु दश अवताराः प्रोक्ताः। तथाहि श्लोकः –

मत्स्यः कूर्मो वराहश्च नृसिंहो वामनस्तथा।
रामो रामश्च रामश्च बुद्धः कल्की दश स्मृताः॥[19]

अत्र त्रिभिः रामशब्दैः यथाक्रमं परशुरामः, रामचन्द्रः, बलरामः चेति त्रयाणाम् अवताराणां बोधः। जयदेवः दशावतारस्तोत्रे अवतारान् प्रस्तौति –

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कालयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥ इति।

अर्थात् जगद्रक्षणमेव अवताराणां मुख्यमुद्देश्यम्। आङ्गलैः निपीडितानां पराधीनानां भारतीयानां उद्धारकेषु मुख्य आसीत् महात्मा गान्धी। तस्य उन्नतजीवनादर्शः, सत्य-अहिंसाचारः, सर्वेषु समत्वभावना, क्षमा, स्नेहः, निःस्वार्थपरायणता, परोपकारित्वं, दयाभावः, उत्साहः, संयमत्वं चेत्यादिगुणान् वीक्ष्य तदानीन्तनकवयः तस्मिन् अवतारसाम्यं दृष्टवन्तः। अतः नायं पुराणप्रसिद्धः अवतारः, अपि तु तद्गुणमुग्धैः आधुनिककविभिः तस्मिन् अवतारत्वं कल्पितमित्यलम् अतिविस्तरेण।

## Endnotes

1. ब्रह्मानन्दशुक्लप्रणीतं श्रीगान्धिचरित-खण्डकाव्यम् - ३
2. श्रीमद्भगवद्गीता, ४/७
3. भारतपारिजातम्, १-५३
4. तत्रेव, २-६
5. तत्रैव, २-१४
6. तत्रेव, २-२३
7. तत्रैव, २-२६
8. तत्रेव, २-३०
9. तत्रैव, २-३८
10. तत्रेव, २-४१
11. गीताचारित्र्यम्, उपोद्घाताध्यायः
12. तत्रैव
13. तत्रैव
14. श्रीगान्धिगौरवम्, प्रथमसर्गः - ७
15. गान्धीगरिमकाव्यम् – ३/८
16. तत्रैव - ३११
17. श्रीगान्धिचरितम् (खण्डकाव्यम्)- १२
18. श्रीगान्धिचरितम्, प्रथमः सर्गः।
19. विष्णुधर्मोत्तरपुराणम्, १/१७१/५

## Bibliography


- टण्डन, कुमुद। (१९९१)। *महात्मा गान्धिपरक संस्कृत काव्य।* दिल्ली ईस्टर्न बुक लिंकर्स।
- त्रिपाठी, शिवगोविन्दः। (१९७७)। *श्रीगान्धिगौरवम्।* जयपुरम् : मातृशरणम्।
- भगवदाचार्यः। १९५१। *भारतपारिजातम् (श्रीमहात्मगांधिचरितम्) (प्रथमो भागः)।* मोस्बासा (ईस्ट आफ्रिका) : रावजीभाई मेघजीभाई, कानजीभाई मेघजीभाई।
- मिश्रः, साधुशरणः। (२०१९ विक्रमसंवत्)। *श्रीगान्धिचरितम्।* चम्पारन : राधाबल्लभ मिश्र जानकी संस्कृत विद्यालय नरकटिया गंज।
- शास्त्री, मोतीरामः। (२०१५ विक्रमसंवत्)। *गीताचारित्र्यम् (प्रथमो भागः)।* खेड़ा : शुद्धाद्वैत संसद्।
- शुक्लः, ब्रह्मानन्दः। (१९६९)। *श्रीगान्धिचरितम्।* खुरजा : शारदा सदनम्।
- गोस्वामी, गोपालकृष्णः। (१८८६)। *दश अवतार।* कलिकाता : लोकनाथघोषेण प्रकाशितम्।
- रायः, दीप्तिमयः। (१३६४ बङ्गाब्दः)। अवतारेर अवतरण। कलिकाता : मण्डल बुक हाउस्।

**शोधग्रन्थः**

- देवी, राजेश्वरी। (१९८५)। संस्कृत वाङ्मय में महात्मा गान्धी। दिल्ली : संस्कृत विभाग, संस्कृत विश्वविद्यालय।


———